दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् कृष्णषष्ठी
आश्विन् 16 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-09 ■ वर्ष-5 ■ अङ्क-343 | 1 | अक्तूबर 02, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 एशियाई-क्रीडासु भारत-पुरुष-हॉकी-दलेन पाकिस्तानं पराजित्य अन्तिम-स्पर्धायां प्रवेशः समधिगतः

4 मुख्यमन्त्रिणः सुक्खुनः महती घोषणा: सेबफलस्य समर्थनमूल्यं वर्धिष्यते, चिड़गाँव- जाङ्गला-क्षेत्रयोः अग्रिमसत्रात् सीबीएसई-विद्यालयाः

7 सनातनधर्मे पितृणां महिमा(पितृपक्षविशेषः) डॉ विमलेश झा,रमेशकुंज,

## अद्यतनीयं सुभाषितम्

**मन्त्रिणां भिन्नसंधाने भिषजां सांनिपातिके।**
**कर्मणि व्यज्यते प्रज्ञा सुस्थे को वा न पण्डितः॥**

भावार्थः- अर्थात्- लड़ाई के समय शत्रु से मेल करने में मंत्रियों की, सन्निपात (ज्वर) रोग में वैद्यों की और कार्यों के साधन में अन्य लोगों की बुद्धि जानी जाती है, अन्यथा केवल बैठे बिठाए कौन बुद्धिमान नहीं है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

# संघ-लोकसेवा-आयोगस्य शतवार्षिकी-यात्रायां जन-विश्वासः अक्षुण्णः अस्ति- प्रधानमन्त्री



नवदेहल्याः भारत-मण्डपे संघ-लोकसेवा-आयोगस्य शताब्दी समारोहं सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् राष्ट्र परिष्कारार्थं द्रुतगत्या त्वरितम् अग्रे सरति। अतः परीक्षा-सञ्चालिकाः संस्थाः अपि राष्ट्रानुकूल-परिष्कृत-कार्याणि कुर्युः। प्रधानमन्त्रिणा प्रोक्तं यत् लोकसेवासु तादृशाः एव युवानः समागच्छेयुः, येषां लक्ष्यं न तु केवलं पद-प्राप्तिः, प्रत्युत निष्काम भावेन लोक-सेवा वर्तते। असौ व्याहरत् यत् एकविंशति-शतकस्य भारतं नवीन-कार्य-संस्कृत्या सह अग्रे याति। श्रीमोदिना प्रतिपादितं यत् परीक्षा न तु काचित् सामान्यम् अनुष्ठानम्, अपितु यूनां भावि-जीवन-प्रवाहेन सह सम्बद्धा अस्ति। परीक्षासु कतिपयानां मासानाम् अपि विलम्बः यूनाम् कृते अतीव कष्टकरो भवति। अत एव परीक्षा-व्यवस्था समय-निश्चयता-सिद्धान्तम् दृढतया अनुसरेत्। प्रधानमन्त्रिणा नरेन्द्र मोदिना प्रतिपादितं यत् संघ-लोकसेवा-आयोगस्य शतवर्षीयायां यात्रायाम् युगानि, प्रशासनानि, तन्त्राणि, पाठ्यक्रमाः च परिवर्तिताः। तथापि अस्यां संस्थायां जन-साधारणानां श्रद्धा-विश्वासः अद्य यावत् तथैव अविचलः अक्षुण्णश्च वर्तते।



# 'एकः दिवसः, एका होरा, एकीभूय' इति स्वच्छता-श्रमदान कार्यक्रमः उत्साहपूर्वकम् आयोजितः

'स्वच्छता हि सेवा' इति अभियानस्यान्तर्गतं देशव्यापी 'एकः दिवसः, एका होरा, एकीभूय' इति स्वच्छता-श्रमदान कार्यक्रमः उत्साहपूर्वकम् आयोजितः। अस्मिन् अभियाने बहुभिः केन्द्रीय-मन्त्रिभिः, मुख्यमन्त्रिभिः, वरिष्ठ-अधिकारिभिश्च भागः गृहीतः। विगत-मासस्य सप्तदश दिनाङ्कात् आरब्धम् इदम् अभियानम् अगामि-अक्टूबर-मासस्य सप्तदशदिनाङ्क यावत् प्रवर्तिष्यते। अस्य वर्षस्य मुख्य ध्येय वाक्यम् 'स्वच्छतायां सहभागः, स्वच्छ-भारतम्, विकसित-भारतम्' इति अस्ति। नवदिल्ल्याः सफदरजङ्ग-समाधि-स्थानके विधि-न्याय-मन्त्री अर्जुनराम-मेघवालः स्वच्छता-कार्ये सहभागमकरोत्। असौ अब्रवीत् यत् स्वच्छता न तु केवलम् एकदिवसीयम् अभियानम्, अपितु अस्माकं दैनन्दिनं दायित्वं भवेत्। अपरञ्च, जलशक्ति-मन्त्री सी. आर. पाटीलः अपि नवदिल्ल्याः कालिन्दीकुञ्ज-घट्टे श्रमदानकार्ये सक्रियं योगदानम् अयच्छत्।

# जन-सहभागितायाः संवर्धनाय अद्य देशव्यापी-विशेष-ग्राम-सभाः समाहूयन्ते



गान्धीजयन्त्यावसरे अशेषे हि देशे विशेषग्रामसभाः समाहूयन्ते । पञ्चायतानां सुदृढीकरणाय, सार्वजनिकसेवानां परिष्कारार्थं, ग्रामीणभारते जीवनस्य गुणवत्तां परिष्काराय च लक्ष्यीकृतानां परिवर्तनशील-शासन-परिष्काराणां तथा उपक्रमाणां विषये च ते चर्चां करिष्यन्ति। ग्रामीणाभिवृद्धि-मन्त्रालयः अवदत् यत् एताः विशेषग्राम-सभाः षड्विंशत्यधिक-द्विसहस्र-सप्तविंशत्यधिक द्विसहस्र वर्षयोः पीपल्स प्लान-कैम्पेन (पीपीसी), सबकी योजना, सबका विकास इत्यस्यापि आरम्भं विधास्यते।

# रक्षा-प्रबन्धनाय एकीकृत-वित्तीय-व्यवस्थायाः आवश्यकता वर्तते - रक्षामन्त्री



नवदेहल्यां रक्षा-लेखा-दिवस-समारोहमधिकृत्य भाषमाणः रक्षा-मन्त्री राजनाथ सिंहः अब्रवीत् यत् तिसृषु सैन्य-शाखासु या समवाय-समन्वय-भावना प्रवर्त्यते, सा एव रक्षा-लेखा-विभागस्य वित्तीय-तन्त्रेऽपि समन्वेतव्या। मन्त्रिप्रवरेण प्रोक्तं यत् यदि वित्तीय प्रणाल्यः अपि एकीकृत-रूपं भजेरन्, तर्हि समग्रं रक्षा प्रबन्धनं सुतराम् कुशलं समर्थञ्च सेत्स्यति। असौ राष्ट्रिय-अन्ताराष्ट्रिय-स्तरयोः गुणवत्तायुक्त-लेखा परीक्षणस्य सर्वोत्तमाः रीतीः अङ्गीकर्तुम्, जगति च एधमानानां मानदण्डैः सह समन्वयं रक्षितुं रक्षा-लेखा-विभागं सम्प्रश्रयम् अबोधयत्।

## नवदेहल्याः लेडी हार्डिङ्ग-चिकित्सा-महाविद्यालये ऐच्छिक रक्तदान-दिवसः आचरितः

नवदेहल्याः लेडी हार्डिङ्ग-चिकित्सा-महाविद्यालये षड्विंशत्यधिक द्विसहस्रतम वर्षस्य राष्ट्रिय-ऐच्छिक रक्तदान दिवसः आचरितः। अस्मिन् अवसरे नीतिष-आयोगस्य स्वास्थ्यः सदस्यः डा. एम्. श्रीनिवासः ऐच्छिक-रक्तदान-शिबिरस्य उद्घाटनम् अकरोत्। जनसमूहं सम्बोधयन् डा. श्रीनिवासः पर्याप्तं सुस्थिरं च रक्तपूर्ति सुनिश्चितुम् ऐच्छिक रक्तदानस्य महत्त्वं उद्घाटितवान्। स्वास्थ्य-परिवार-कल्याण-मन्त्रालयः अवदत् यत् राष्ट्रव्यापी-बृहत्-स्वैच्छिक रक्तदान-अभियानस्य भागत्वेन एतत् राष्ट्रिय-आचरणम् अस्ति।



## नागरिक-विमानयन-मन्त्रिणा वैमानिकस्य कैप्टन-स्मित-मछारस्य शौर्यस्य भूरिशः प्रशंसा विहिता

नागरिक-विमानयन-मन्त्री राममोहन नायडुः अब्रवीत् यत् देशः वैमानिकस्य कैप्टन-स्मित-मछारस्य असाधारण-साहसेन उपस्थिति-बुद्ध्या च अतीव गौरवान्वितः अस्ति, येन विमानस्थसर्वेषां यात्रिणां प्राणाः सुरक्षिताः। मन्त्रिप्रवरेण निगदितं यत् भारतीय-वैमानिकाः स्वकीयेन कौशलेन, अनुशासनेन, निष्ठापूर्ण-सुरक्षा-प्रतिबद्धतया च जगति प्रतिष्ठां लब्धवन्तः। श्रीनायडुः आत्मनः पूर्वं सेवा इति भारतीय-भावनायाः उज्ज्वल-संरक्षणाय मछार-वर्याय भूरिशः प्रशंसा-कुसुमानि अयच्छत्।



## पाकिस्तानेन अफ़गानिस्तानदेशे नागरिक-गृहेषु वायु प्रहारः कृतः

पाकिस्तानेन अफ़गानिस्तानस्य कुनार-हेलमन्द-मण्डलयोः नागरिक-गृहेषु कृत वैमानिक-आक्रमणेषु स्त्री-शिशून् समादाय न्यूनातिन्यूनं दश आफ़गान-नागरिकाः मृताः, एकादश अन्ये च व्रणिताः। तालिबान-प्रवक्त्रा ज़बीहुल्लाह-मुजाहिद इत्यसौ अकथयत् यत् अस्मिन् आक्रमणे कुनार-मण्डलस्य शुल्तान-क्षेत्रे हेलमन्द-मण्डले त्रीणि भवनानि विनष्टानि । अस्य वैमानिक प्रहारस्य तीव्र विगर्हणं कुर्वन् मुजाहिद इत्यसौ प्रत्यारोपितवान् यत् पाकिस्तानदेशः स्वकीय-राजनैतिक-आर्थिक-सङ्कटेभ्यः जन-ध्यानम् अपसारयितुम् आफ़गानिस्तान-विरोधि-नीतिं समाश्रयति ।

## भारतीय-नौसैन्यबलानां पोतः 'आई.एन.एस.तर्कश केन्या-देशस्य मोम्बासानगरस्य पोताश्रयं प्राप्नोत्

भारतीय-नौसैन्यबलानां प्रमुखः पोतः 'आई.एन.एस. तर्कश स्वस्य यात्रा-क्रमे केन्या-देशस्य मोम्बासानगरस्य पोताश्रयं प्राप्नोत् । रक्षामन्त्रालयेन प्रोक्तं यत् अयं प्रवासः ऐतिहासिक-सांस्कृतिक-सम्बन्धैः सम्बद्धयोः भारत-केन्या-समुद्र-राष्ट्रयोः प्रगाढ सम्बन्धान् दृढयति। प्रवासावधौ उभयोः देशयोः नौसैन्यबलानां मध्ये व्यावसायिक-सामाजिक-सम्पर्काः, ज्ञान-विनिमयः, भावनानुकूलः सामुद्रिक सुरक्षा-सहयोगः च प्रवर्तिष्यन्ते।

## एशियाई-क्रीडासु भारत-पुरुष-हॉकी-दलेन पाकिस्तानं पराजित्य अन्तिम-स्पर्धायां प्रवेशः समधिगतः



जापानस्य काकामिगाहारा नगरे आयोजितायां एशियाई-क्रीडायां भारतीय-पुरुष-हॉकी-दलेन चिर-प्रतिद्वन्द्विनं पाकिस्तान-देशं चत्वारि-त्रिणी इति चक्रैः पराजित्य अन्तिम-स्पर्धायां प्रवेशो लब्धः। अन्तिम-क्रीडायां भारतस्य साम्मुख्यं दक्षिण कोरिया-मलेशिया-देशयोः विजेत्रा सह भविष्यति। महिला-दलमपि अद्य चीन-देशेन सह स्पर्धिष्यते।




## दुर्गापूजायाः पूर्वं बी. एस. एल. कर्मचारिभ्यः

### अधिलाभांशराशिः (बोनस) प्रदास्यते

**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, बोकारोनगरम्** दीर्घकालानन्तरं बोकारोइस्पातसंयन्त्रे (बीएसएल) कार्यरतेभ्यः कर्मचारिभ्यः प्रशिक्षुभ्यश्च दुर्गापूजायाः पूर्वमेव अधिलाभांशराशिः प्रदास्यते। षड्विंशत्यधिक-द्विसहस्रतमस्य वर्षस्य (२०२६) अक्टूबरमासस्य एकादशदिनांके कलशस्थापनया दुर्गापूजायाः शुभारम्भः भविष्यति। ततः पूर्वमेव कर्मचारिणां वित्तकोषलेखासु अधिलाभांशराशिः प्रेषयिष्यते। अधिलाभांशनिर्धारणसम्बन्धे गुरुवासरे नवदिल्लीनगरे एन. जे. सी. एस. इत्यस्य सभा आयोजिता। सभायां विक्रयप्रबन्धनेन कर्मचारिभ्यः ३२,००० रूप्यकाणि, प्रशिक्षुभ्यः २५,६०० रूप्यकाणि अधिलाभांशरूपेण प्रदातुं प्रस्तावः प्रस्तुतः। सर्वैः श्रमिकसङ्घटनानां नेतृभिः प्रस्तावस्य अनुमोदनं कृत्वा सन्धिपत्रे हस्ताक्षराणि कृतानि। ज्ञातव्यं यत् श्रमिकसङ्घटनानां पक्षतः अस्मिन् वर्षे ४०,५०० रूप्यकाणां अधिलाभांशस्य आग्रहः कृतः आसीत्। तथापि प्रबन्धनेन निर्धारितस्य अधिलाभाधारेण अन्ततः सन्धिः सम्पन्ना अभवत्। दुर्गापूजायाः पूर्वम् अधिलाभांशराशेः प्राप्त्या बीएसएलकर्मचारिषु प्रशिक्षुषु च उत्साहः वर्तते। बोकारोइस्पातसंयन्त्रस्य ८७४१ कर्मचारिणः प्रशिक्षवश्च एतस्य लाभं प्राप्स्यन्ति। अक्टूबरमासस्य दशम्या तिथेः पूर्वमेव कर्मचारिणां वित्तकोषलेखासु अधिलाभांशराशिः प्रेषयितुं प्रक्रिया प्रारब्धा भविष्यति।






## अंशविपण्यां निरन्तरं चतुर्थे दिने तीव्रविक्रयः, निवेशकानां ९.५ लक्षकोटिरूप्यकाणां मूल्यह्रासः

### बीएसई- सेन्सेक्ससूचकांकः ७१९०९.७०, निफ्टी ५० सूचकांकः २२४२१.९५

**हिमसंस्कृतवार्ताः- डॉ. विमलेशझा, मुम्बई, १ अक्तूबर २०२६।** भारतीय-अंशविपण्यां गुरुवासरे निरन्तरं चतुर्थेऽपि दिने तीव्रः विक्रयप्रभावः दृष्टः। अस्य परिणामस्वरूपं विगतेषु पञ्चविंशतिवर्षेषु सर्वाधिकं दुर्बलं साप्ताहिकं प्रदर्शनं दृष्टम्। विपण्यां निरन्तरम् अष्टमं सप्ताहमपि ह्रासः अभवत्। अद्यतनस्य विपणिसत्रस्य अवनत्या निवेशकानां प्रायः ९.५ लक्षकोटिरूप्यकाणां सम्पत्तेः मूल्यह्रासः अभवत्। बीएसई- सेन्सेक्स ५७०.५९ अङ्कैः, अर्थात् ०.७९ प्रतिशतम्, अधः गत्वा ७१,९०९.७० अङ्केषु आगतः। अन्तर्दिवसीयविक्रयप्रभाववस्य समये सेन्सेक्स १,१०० अङ्केभ्यः अधिकं पतित्वा ७१,२९२.८८ अङ्कपर्यन्तमपि अधः गतवान्। निफ्टी- ५० सूचकाङ्कः १९८.५० अङ्कैः, अर्थात् ०.८८ प्रतिशतं, ह्रासं प्राप्य २२,४२१.९५ अङ्केषु आगच्छत्। विपण्याः अवनतेः प्रमुखेषु कारणेषु विदेशीय- संस्थागतनिवेशकानां तीव्रविक्रयः प्रमुखः आसीत्। बुधवासरे विदेशीय- संस्थागत-निवेशकाः १०,१४८.४१ कोटिरूप्यकाणां अंशान् विक्रीतवन्तः। तेन विपण्यां विक्रयभारः वर्धितः। तदनन्तरं वाहनक्षेत्रस्य दुर्बलविक्रयपरिणामाः अपि विपण्याः भावनां प्रभावितवन्तः। अपेक्षानुरूपं वाहनविक्रयः न भवितुं निफ्टी- ऑटोसूचकाङ्कः प्रायः ३.८६ प्रतिशतं पतितः। वैश्विकस्तरे बन्धप्रतिफलस्य वृद्धिः तथा अपरिष्कृततैलस्य वर्धमानानि मूल्यानि अपि निवेशकानां चिन्ताम् वर्धितवान्। वैश्विकविपणिषु विद्यमानस्य दुर्बलभावस्य प्रभावः भारतीय- अंशविपण्यामपि दृष्टः। विस्तृतविपण्यामपि तीव्रः विक्रयः अभवत्। निफ्टी- मिडकैप-१०० तथा निफ्टी- स्मॉलकैप-१०० सूचकाङ्कौ द्वाभ्यां प्रतिशताभ्यामपि अधिकं पतितौ। तेन मध्यलघुनिवेशकानां निवेशमूल्येष्वपि उल्लेखनीयः ह्रासः अभवत्। समग्रतया विदेशीय-निवेशकानां तीव्रविक्रयः, वाहनक्षेत्रस्य दुर्बलप्रदर्शनं, वैश्विकबन्धप्रतिफलस्य वृद्धिः, अपरिष्कृततैलस्य अधिकानि मूल्यानि तथा विस्तृतविपण्यां विक्रयभारः एतेषां समवायेन १ अक्तूबरस्य भारतीय-अंशविपण्यां तीव्रा अवनतिः अभवत्।

# उच्चन्यायालयः सर्वकाराय आरामम् अयच्छत्: उक्तवान् यत् न्यूनानां छात्राणां विद्यालयानां स्तरं न्यूनीकर्तुं निर्णयः समीचीनः अस्ति




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य उच्चन्यायालयः न्यूनानां छात्राणां संख्यायुक्तानां सरकारी- उच्च- तथा- वरिष्ठ- माध्यमिक- विद्यालयानां स्तरं न्यूनीकर्तुं समीपस्थेषु विद्यालयेषु तेषां विलीनीकरणस्य च राज्यसर्वकारस्य निर्णयं समीचीनं मन्यते। न्यायालय अवदत् यत् पञ्च वा ततो न्यूनान् छात्रान् चालनं न केवलं सरकारीसंसाधनानाम् अपव्ययः अस्ति, अपि तु एतत् छात्राणां मानसिकविकासाय स्पर्धात्मक-वातावरणाय च विरुद्धम् अस्ति। न्यायाधिपत्योः अजयमोहनगोयलस्य योगेश जसवालस्य च खण्डपीठः विद्यालय- प्रबन्धन- समितीनां याचिकाः निराकृत्य अवदत् यत् १४ अक्टोबर २०२५ दिनाङ्के निर्मितायां अधिसूचनायां काऽपि अवैधता नास्ति। न्यायालयः शिक्षकानां युक्तिकरणीकरणम् उपलभ्यमानानां साधनानां च श्रेष्ठतमम् उपयोगम् आवश्यकम् अन्नतवान्। उच्चन्यायालयः महाधिवक्तायाः वक्तव्यम् अभिलेखे गृहीत्वा राज्यसर्वकारम् आदिशत् यत् येषां छात्राणां विद्यालयाः विलीनीकृताः सन्ति, तेभ्यः छात्रेभ्यः नूतनं विद्यालयं प्रति गमनार्थं निशुल्का पर्याप्तपरिवहनसुविधा च प्रदीयताम्। येषु विषयेषु उच्चन्यायालयात् पूर्व स्थगनदेशाः प्रदत्ताः आसन्, तेषु वर्तमानव्यवस्था वर्तमानशैक्षणिकसत्रस्य अन्तपर्यन्तं स्थास्यति।

## न्यूनाङ्कानां विद्यालयेषु शिक्षकानां नियुक्तौ अपि टिप्पणी

न्यायालयः अवदत् यत् नवमीतः द्वादशीपर्यन्तं छात्राणां सर्वाङ्गीणविकासाय तादृशं वातावरणम् आवश्यकम् अस्ति, यत्र ते सहपाठिभिः सह अध्ययनस्य संवादस्य चावसरं प्राप्तुं शक्नुयुः। यदि कापि कक्षायाम् केवलम् एकौ द्वौ वा विद्यार्थी स्तः, तर्हि स्वस्थस्पर्धायाः पारस्परिकसंवादस्य च अवसरः सीमितो भवति। न्यायालयेन उक्तं यत् अतिन्यूनविद्यार्थिसङ्ख्यायुक्तानां विद्यालयानाम् आवश्यकतातोऽधिकशिक्षकानां नियुक्तेः सर्वकारोपरि अतिरिक्तार्थिकभारः पतति। एतादृशाः शिक्षकाः तेषु विद्यालयेषु नियुक्ताः भवितुम् अर्हन्ति यत्र विद्यार्थ्यानां सङ्ख्या अधिका अस्ति शिक्षकाणां च न्यूनता अस्ति।

## अयम् अस्ति सम्पूर्णः विषयः

ज्ञातव्यम् अस्ति यत् राज्यसर्वकारः १४ अक्तूबर २०२५ दिनाङ्के अधिसूचनां प्राकाश्य १८ सितम्बर २०२५ पर्यन्तं पञ्च वा ततो न्यूनानाम् प्रवेशयुक्तानां बहूनाम् उच्च-वरिष्ठमाध्यमिकविद्यालयानां स्तरं न्यूनीकर्तुं विद्यार्थ्यानां च समीपस्थविद्यालयेषु विलीनीकरणस्य निर्णयं कृतवान् आसीत्। विविधानां विद्यालयानां एसएमसी-समितयः भौगोलिकदूरतां विद्यार्थ्यानां यात्रासम्बन्धीकष्टानि च आधृत्य अस्य निर्णयस्य उच्चन्यायालये विरोधं कृतवत्यः आसन्।

# हिमाचले त्रयोविंशति-सेतूनां निर्माणाय 'पीईसी' मण्डलेन दत्ता हरित-पताका. 'प्रधानमन्त्री- ग्राम- सड़क- योजना- ४'

### इत्यस्याः प्रथमे चरणे भविष्यन्ति सज्जाः




**हिमसंस्कृतवार्ताः- शिमला।** 'प्रधानमन्त्री- ग्राम- सड़क- योजना' इत्यस्याः चतुर्थचरणस्य प्रथमसमूहे राज्ये त्रयोविंशतिसेतूनां निर्माणार्थं केन्द्रीय- पूर्व- सशक्त- समित्या स्वीकृतेः हरित-पताका प्रदत्ता। यद्यपि केषाञ्चित् प्रस्तावितानां सेतूनां विस्तृत-परियोजनाप्रतिवेदने समित्या काश्चित् आपत्तयः कृताः सन्ति। एतासां दोषाणां निवारणानन्तरं सेतूनां प्रस्तावाः केन्द्रस्य सशक्त-समित्याः आगामि-उपवेशने प्रस्तोष्यन्ते, यतः अन्तिम- स्वीकृत्यनन्तरं केन्द्रसर्वकारः अग्रिम-कार्यविधिं विधास्यति।
प्राप्तवृत्तानुसारं 'पी. एम. जी. एस. वाई.- ४' इत्यस्य प्रथमचरणे प्रदेशस्य विविधासु दिक्षु २३ सेतवः निर्मातव्याः सन्ति, येषां कृते लोक- निर्माण-विभागेन 'डीपीआर' प्रारूपं निर्मितम् अस्ति। अस्याः प्रक्रियायाः आरम्भे केन्द्रस्य पूर्व- सशक्तसमित्याः उपवेशने लोक-निर्माण-विभागेन सज्जीकृतेषु प्रतिवेदनेषु गम्भीर-मन्थनं जातम्। समित्या केषाञ्चित् सेतूनाम् अनुमानित- व्ययपत्रस्य पुनरीक्षणाय, अन्येषां च कानिचित् तकनीकी- संशोधनानि कर्तुं निर्दिष्टाः। तथापि अधिकांश- प्रस्तावेषु पूर्व-सशक्त-समित्या स्व-सहमतिः प्रकटिता। अधुना लोक-निर्माण-विभागः समित्या दर्शितानां त्रुटीनां परिष्कारे संलग्नो वर्तते।

### मासद्वयानन्तरं प्राप्स्यते अन्तिमस्वीकृतिः; शिमलामण्डले सर्वाधिकम् अष्ट सेतवः

सेतूनां 'डीपीआर'-प्रतिवेदनस्य सर्वाङ्गीण-निरीक्षणानन्तरं केन्द्रस्य सशक्त-समितिः स्वकीयम् अनुमोदनं दास्यति। तदनन्तरम् एते प्रस्तावाः वित्तमन्त्रालयस्य, ततश्च केन्द्रीय- ग्रामीण- विकास-मन्त्रालयस्य अन्तिमस्वीकृत्यै गमिष्यन्ति। अस्याः समग्रायाः प्रक्रियायाः सम्पादनाय प्रायः मास-द्वयस्य समयः सम्भाव्यते।

**प्रस्तावितेषु २३ सेतुषु मण्डल-वार-वितरणम्-**

> शिमला-मण्डलम्: सर्वाधिकं ८ सेतवः
> किन्नौर-मण्डलम्: ४ सेतवः
> चम्बा-कुल्लू-मण्डले: प्रत्येकस्मिन् ३-३ सेतवः
> लाहौल-स्पीति-मण्डलम्: २ सेतौ
> काङ्गड़ा-सोलन-ऊना-मण्डलानिः प्रत्येकस्मिन् १-१ सेतुः

सर्वकारेण सज्जीकृते प्रस्तावे अधिकांश-सेतवः 'स्टील-ट्रस' प्रारूपेण निर्मिताः भविष्यन्ति। सहैव पीसीसी-बाक्स-गर्डर आरसीसी-टी-बीम इत्यादयः सेतवः अपि अत्र अन्तर्भवन्ति।
उल्लेखनीयं यत् प्रधानमन्त्री- ग्राम- सड़क-योजनायाः चतुर्थचरणे राज्ये २९४ मार्गाणां निर्माणं भविष्यति। प्रायः २३०० किलोमीटर- परिमित-नूतनमार्गाणां निर्माणाय लोक-निर्माण-विभागेन अधिकांशा निविदाप्रक्रिया समापिता अस्ति। अधुना विभागः प्रथम-चरणस्य सेतूनां निर्माणाय केन्द्रसर्वकारात् औपचारिकां स्वीकृतिं प्राप्तुं सर्वाणि संलग्नानि कार्याणि द्रुतगत्या पूरयति।

# अन्तर्राष्ट्रियस्तरे प्राप्तं प्रतिष्ठितं सम्मानम्

## अन्तर्राष्ट्रिय- संस्कृतरत्नसम्मानेन सम्मानितः डॉ. चिराग हेमन्तकुमार पुरोहितः



**हिमसंस्कृतवार्ताः- जगदीश डाभी, गुजरातम्**
बैंकाक (थाईलैंड) स्थितायाः शिल्पकोर्न विश्वविद्यालयस्य प्राङ्गणे भारतशासनेन संचालितस्य संस्कृताध्ययनकेंद्रस्य, ग्लोबलसंस्कृतफोरम-भारतस्य संयुक्तोपक्रमे आयोजितस्य पंचमस्य अन्तर्राष्ट्रियग्लोबलसंस्कृतसंगोष्ठ्याः "भारतीय-ज्ञानपरम्पराः संस्कृतिज्ञानपरम्पराणां सेतुबन्धनम्" इति विषयिकायाः त्रिदिवसीयस्य भव्यायोजनस्य द्वितीये दिने ऑफलाइन अकादमिकसत्रे सत्राध्यक्षस्य प्रो. रजनीश शुक्लस्य, सह-अध्यक्षायाः प्रो. जया मिश्रायाः, संयोजकस्य डॉ. कुमार बागेवाडीमठस्य गरिमामयि-उपस्थितौ गुजरातस्य गोधरास्थितायाः जयजलाराम-आयुर्वेदिक- चिकित्सा महाविद्यालयः (शिवपुरी) इत्यस्याः डॉ. चिराग हेमन्तकुमार पुरोहितः "संस्कृतसाहित्ये पर्यावरणचिन्तनम्: आयुर्वेददृष्ट्या समकालीन- वैश्विक- प्रासंगिकतायाः समीक्षात्मकमध्ययनम्" इति विषये स्वकीयम् उत्कृष्टं शोधपत्रं प्रस्तुतवान्। अस्मिन् शोधपत्रे सः संस्कृतसाहित्ये पर्यावरणचेतनायाः, आयुर्वेद-दृष्टिकोणेन समकालीन- वैश्विक- प्रासंगिकतायाः उपरि अत्यन्तं ज्ञानवर्धकं समीक्षात्मकञ्च विश्लेषणं प्रस्तुत्य देश-विदेशानां विद्वज्जनान् प्रभावितवान्। एतस्मिन् वैश्विकमंचे तस्मै संस्कृतसेवाये, संस्कृतिं प्रति अद्वितीयसमर्पणाय, निष्ठायै, सततसाधनायै "अन्तर्राष्ट्रिय- संस्कृतरत्नसम्मानम्" प्रदत्तम्। एतत् तस्य कृते, समग्रसंस्थायाः कृते अपि महागौरवस्य क्षणः अस्ति।

# मुख्यमन्त्रिणः सुक्खुनः महती घोषणाः सेबफलस्य समर्थनमूल्यं वर्धिष्यते, चिड़गाँव- जाङ्गला- क्षेत्रयोः अग्रिमसत्रात् सीबीएसई- विद्यालयाः






**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य मुख्यमंत्री सुखविन्द्रसिंहसुक्खू गुरुवासरे शिमलाजनपदस्य रोहड़ू-प्रवाससमये बहूनि महत्त्वपूर्णानि घोषणाणि कृतवान्। मुख्यमन्त्री सुखविन्द्रसिंहः चिड़गाँवक्षेत्रे जनसभां सम्बोध्य सेबफलस्य समर्थनमूल्ये एकरुप्यस्य वृद्धेः घोषणां कृतवान्। इदानीं मण्डी- मध्यस्थता- योजनायाः अन्तर्गतं सेब-फलस्य समर्थनमूल्यं द्वादशरूप्यकेभ्यः वर्धित्वा त्रयोदशरूप्यकाणि भविष्यति। मुख्यमन्त्री चिड़गाँवस्य संदासु-स्थाने नागरिक- चिकित्सालयस्य स्थापनायाः अपि घोषणां कृतवान्। तथैव चिड़गाँव- वरिष्ठ- माध्यमिक- विद्यालयस्य जाङ्गला- वरिष्ठ- माध्यमिक- विद्यालयस्य च सीबीएसई- विद्यालयरूपेण रूपान्तरणस्य घोषणा कृता। मुख्यमन्त्री अवदत् यत् चिड़गाँवक्षेत्रे एसडीएम-कार्यालयस्य (उपमण्डल- कार्यालयस्य) स्थापनायै सर्वेक्षणं करिष्यते। शीघ्रम् एव चिड़गाँव-क्षेत्राय उपमण्डलस्य उपहारः प्रदास्यते। अस्य पूर्वं चिड़गाँव- प्राप्तिसमये स्थानीयजनैः मुख्यमन्त्रिणः भव्यं स्वागतं कृतम्।

## रोहड़ू-विद्यालयस्य नूतनभवनाय द्विकोटि-रूप्यकाणां घोषणा, छात्रैः सह सम्भाषणम्

मुख्यमन्त्री सुक्खूः रोहड़ू-स्थितस्य पीएमश्री-राजकीय- आदर्श- वरिष्ठमाध्यमिक- विद्यालयस्य (सीबीएसई) छात्रैः सह सम्भाषणं कृतवान्। अस्मिन् समये ते छात्राणां विविधानां प्रश्नानाम् उत्तराणि दत्तवन्तः, तेषां जिज्ञासाः विचारांश्च श्रुतवन्तः। सम्भाषणकाले एका छात्रया विद्यालयस्य नूतनभवनस्य या याचना प्रस्तुता, तस्य उत्तरत्वेन मुख्यमन्त्रिणा नूतनभवनस्य निर्माणाय द्विकोटिरूप्यकाणां प्रदानाय घोषणा कृता। सः अवदत् यत् नूतनभवनस्य निर्माणाय एषा राशिः पर्याप्ता न भविष्यति तथा च राज्यसर्वकारः आवश्यकतानुसारम् अतिरिक्तराशिम् अपि प्रदास्यति। सः अवदत् यत् नूतनपरिसरस्य निर्माणाय किञ्चित् समयः लाभास्यति, परन्तु सर्वकारस्य लक्ष्यं प्रदेशे सीबीएसई-विद्यालयानाम् कृते आधुनिकीकृताभिः उत्तमासुविधाभिः युक्तानाम् उत्कृष्टपरिसराणां निर्माणं कर्तुम् अस्ति। छात्रया उक्तं यत् सीबीएसई-विद्यालयः बननेन रोहड़ू-विद्यालये छात्राणां संख्या वर्धिता अस्ति, अतः अत्र द्वयोः सत्रयोः कक्षाः प्रचालनीयाः भवन्ति। तदर्थम् अत्र नूतनभवनस्य आवश्यकता वर्तते। सुक्खूः अवदत् यत् प्रदेशसर्वकारः सर्वकारीक्षेत्रे सीबीएसई- विद्यालयानां स्थापनायां विशेषं बलम् ददाति। अस्य उद्देश्यं ग्रामीणक्षेत्राणां बालकेभ्यः गुणवत्तापूर्णशिक्षायाः उत्तमाः अवसराः प्रदातुं वर्तते, येन तेभ्यः निजीविद्यालयानां समानाः आधुनिक- गुणवत्तापूर्ण- शैक्षणिकसुविधाः प्राप्येरन्।

## सर्वकारः हिमाचलप्रदेशम् आत्मनिर्भरं कर्तुम् दिशि कार्यं कुर्वन् अस्ति- मुख्यमन्त्री

एकः छात्रः मुख्यमन्त्रिणं पृष्टवान् यत् तेषां कृते सर्वाधिकं चुनौतीपूर्णं कार्यं किम् अस्ति- जनानां अपेक्षाणां पूर्तित्वम् अथवा स्वसमयस्य प्रबन्धनम्? अस्य उत्तरत्वेन मुख्यमन्त्री अवदत् यत् द्वे अपि महत्त्वपूर्ते स्तः, परन्तु प्रदेशस्य आर्थिकस्थितौ कालबद्धं संशोधनस्य आनयनम् एव महती समस्या आसीत्। सः अवदत् यत् राज्यसर्वकारः हिमाचलप्रदेशम् आत्मनिर्भरं कर्तुम् दिशि कार्यं कुर्वन् अस्ति तथा च आगमिकसमये प्रदेशं देशस्य अग्रगण्येषु समृद्धेषु च राज्येषु परिगणयितुं लक्ष्यम् अस्ति। यूकेजी-वर्गस्य एका छात्रिका ठाकुर सुखविन्द्रसिंहसुक्खूम् तस्याः बाल्यावस्थायां पितामह- पितामहीभ्यां श्राव्यमाणानां कथानां विषये पृष्टवती। मुख्यमन्त्री स्वबाल्यावस्थायाः स्मृतीः साझां कुर्वन् अवदत् यत् शीतकालस्य समये परिवार सदस्याः अग्नेः समोपम् उपविश्य तान् कथाः श्रावयन्ति स्म। सः 'सप्तभगिनीनाम्' कथायाः अपि उल्लेखं कृतवान्।

## छात्रैः एआई, रोजगारस्य च विषये अपि मुख्यमन्त्री पृष्टः

एकः छात्रः एआई-तन्त्रज्ञानस्य वर्धमानोपयोगेन बालकानां बौद्धिकविकासे पतमानस्य प्रभावस्य विषये प्रश्नम् अपृच्छत्। मुख्यमन्त्री अवदत् यत् एआई आधुनिकसमयलस्य महत्त्वपूर्णं तन्त्रज्ञानम् अस्ति, परन्तु तस्य प्रभावीपयोगाय शिक्षायाः ज्ञानस्य च दृढः आधारः आवश्यकः अस्ति। सः छात्रान् मनसा अध्ययनं कर्तुम् आह्वयन् अवदत् यत् शिक्षा एव तान् भविष्यस्य आह्वानानां सामनं कर्तुं समर्थान् करिष्यति। रोजगारस्य अवसराणां विषये पृष्टस्य प्रश्नस्य उत्तरत्वेन मुख्यमन्त्री अवदत् यत् छात्राणां कृते उत्तमा शिक्षा सर्वाधिकम् आवश्यकी अस्ति, यतः शिक्षा तेषां चिन्तनशक्तिं विकासयति तथा च भविष्ये सही मार्गं चिनोतुं साहाय्यं करोति। सः अवदत् यत् राज्यसर्वकारः सरकारीक्षेत्रे रोजगारस्यावसराणां प्रदानाय सहैव स्वरोजगारम् अपि प्रोत्साहयति, येन युवकाः स्वयम् आत्मनो कृते रोजगारस्य नूतनान् अवसरान् सृजेयुः। मुख्यमन्त्री छात्रैः सह सम्भाषणं कुर्वन् अवदत् यत् हिमाचलप्रदेशस्य भविष्यं उज्ज्वलं वर्तते। राज्यसर्वकारः प्रदेशम् आत्मनिर्भरं कर्तुम् आर्थिकरूपेण सुदृढं समृद्धं च रूपेण विकसितुं प्रतिबद्धः अस्ति। अस्मिन् अवसरे विधायकः मोहनलाल प्राक्टा, नशानिवारणबोर्डस्य सहसंयोजकः संजयभारद्वाजः, उपायुक्तः अनुपमकाशपः, पुलिस-अधीक्षकः गौरवसिंहः अन्ये च गणमान्याः जनाः उपस्थिताः आसन्।

मुख्यमन्त्रिणा रोहड़ू-क्षेत्रे 'एण्टी-चिट्टा' यात्रां हरितध्वजः प्रदर्शितः, स्वयं नेतृत्वं च कृतम्। मुख्यमन्त्री सुक्खूः राजकीय- वरिष्ठ- माध्यमिक- पाठशालातः 'एण्टी-चिट्टा' (नशा-विरोधिनी) यात्रा हरितध्वजं प्रदर्शयित्वा प्रेषितवान्। मुख्यमन्त्री स्वयम् रल्याः नेतृत्वं कृतवान् छात्रैः सह च तस्यां प्रविश्य नशा- विरोधिजागरूकतायाः सन्देशं दत्तवान्। यात्रायाः समये रोहड़ू-बजारक्षेत्रे 'नशा त्यजत, जीवनेन सह सम्बन्धं योजयत' (नशा छोड़ो, जिंदगी से नाता जोड़ो) इत्येतैः उद्घोषैः गुञ्जायमानम् अभवत्। छात्रैः विशालसंख्यायां यात्रां प्रविश्य नशा-विरोधिजनजागरूकतायाः सन्देशः प्रदत्तः। अस्मिन् अवसरे मुख्यमन्त्री अवदत् यत् सर्वकारः नशा-माफियाविरुद्धं कठोरकार्यान्वियनं कुर्वन् अस्ति, नशाव्यापारे संलिप्तानां जनानां कृते हिमाचलप्रदेशे कोऽपि अवकाशः नास्ति। सः अवदत् यत् नशाविरुद्धं युद्धं केवलं सर्वकारस्य दायित्वं नास्ति, अपि तु समाजस्य प्रत्येकवर्गस्य सामूहिकं दायित्वमस्ति। सः अवदत् यत् प्रदेशव्यापि 'एण्टी-चिट्टा'-यात्राः जागरूकता-कार्यक्रमाणां च आयोजनं क्रियते, येन युवकाः जनसामान्यश्च च चिट्टा- अन्य- पदार्थानाम् दुष्प्रभावानां विषये ज्ञापिताः भवेयुः, नशा-दूरस्थाः भवितुम् प्रेरिताः भवेयुः। सः अवदत् यत् नशा-विरुद्धजागरूकतायां युवकानां भूमिका प्रमुखा अस्ति। अस्य पूर्वं मुख्यमन्त्रिणा छात्रेभ्यः 'एण्टी-चिट्टा'- शपथः अपि प्रदर्शिता, तैः सह नशा-दूरस्थत्वस्य समाजं च नशामुक्तं कर्तुम् सक्रियभूमिकायाः निर्वाहणस्य आह्वानम् अपि कृतम्। अस्मिन् अवसरे मुख्यमन्त्री बालकैः सह सेल्फी-चित्रमपि रचयित्वा तान् उत्साहितवान्।

# वृद्धाः अस्माकं परिवारस्य समाजस्य च जीवन्त-धरोहराः सन्ति- आचार्यः ललितकुमार अवस्थी





**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा**
सरदारपटेलविश्वविद्यालय मण्डी इत्यस्य इतिहासविभागेन अन्ताराष्ट्रिय- वृद्धजन-दिवसस्य अवसरे 'अस्माकं वृद्धाः अस्माकं धरोहरः' इति विषये बल्हवैली- कल्याणसभा भङ्गरोटू स्थिते वृद्धाश्रमे विशेषसंवादः सेवाकार्यक्रमः च विकसित- भारत- द्विसहस्र- सप्तचत्वारिंशत् (2047) इत्यस्य अन्तर्गतम् आयोजितः। शुभारम्भे सर्वेषां वृद्धानाम् आत्मीय- स्वागतस्य परिचयानन्तरं वरिष्ठ- नागरिकेभ्यः फलानि, आवश्यक- उपयोगीसामग्री च वितरिता। कार्यक्रमस्य विशेष- आकर्षणं विद्यार्थिभिः वरिष्ठनागरिकाणां जीवन संस्मरणानाम् अनुभवानां च सङ्कलनं, वरिष्ठनागरिकैः सह संवादं कृत्वा तेषां जीवनं, सङ्घर्षं, सामाजिकपरिवेशं, पारिवारिकमूल्यानि, मण्डीक्षेत्रेण सम्बद्धाः स्मृतयः च ज्ञातुं प्रयासः आसीत्। कार्यक्रमस्य अवधौ आश्रम परिसरे स्वच्छता सेवा गतिविधिः अपि आयोजिता। अस्मिन् अवसरे सरदारपटेल-विश्वविद्यालयः मण्डी इत्यस्य कुलपतिः आचार्यः ललितकुमार अवस्थी विशेषरूपेण उपस्थितः आसीत्। सः अन्ताराष्ट्रिय- वृद्धजनदिवसस्य अवसरे इतिहासविभागेन आयोजितस्य 'अस्माकं वृद्धाः अस्माकं धरोहरः' इति कार्यक्रमस्य श्लाघां कुर्वन् अवदत् यत् अस्माकं वृद्धाः अस्माकं परिवारस्य समाजस्य च जीवन्त- धरोहराः सन्ति। ते अस्माकम् उत्तरदायित्वं, शक्तिः, धरोहरः च सन्ति। तेषां जीवनानुभवेषु अस्माकं संस्कृतेः परम्पराणां सङ्घर्षाणां जीवन मूल्यानां च अमूल्याः स्मृतयः सुरक्षिताः सन्ति। तेषाम् अनुभवानां श्रवणम् आगामिपीढीं यावत् प्रापणं च अस्माकं सामाजिक दायित्वेन सह इतिहास संरक्षणस्य अपि महत्त्वपूर्णं कार्यम् अस्ति। कुलपतिः प्रो अवस्थी अस्मिन् अवसरे मण्डीनगरस्य स्मृतयः मौखिक- इतिहास-संवादः, विद्यार्थी- वरिष्ठनागरिकसंवादः, 'एकः विद्यार्थी एकः वृद्धः' इति अभियानस्य च शुभारम्भम् अकरोत्। इतिहासविभागस्य विभागाध्यक्षः कार्यक्रम- संयोजकः डॉ. राकेशकुमारशर्मा कार्यक्रमस्य उद्देश्यं वर्णयन् अवदत् यत् वरिष्ठ नागरिकाणां जीवनानुभवेभ्यः ज्ञानाय सामाजिकयोगदानाय जीवन मूल्येभ्यः च सम्मान प्रदानं, नूतनपीढीं तेषाम् अनुभवैः धरोहरेण च योजनम् अस्य लक्ष्यम् अस्ति। वृद्धाः केवलं परिवारस्य सदस्याः न अपि तु समाजस्य जीवन्ती स्मृतेः अनुभवानां च भण्डारः सन्ति। सः अवदत् यत् अस्माकं वृद्धाः अस्माकं धरोहरः इति प्रयासस्य माध्यमेन इतिहास विभागः नूतनपीढीं वरिष्ठ जनानाम् अनुभवैः सह योजयितुं मौखिक इतिहासस्य संरक्षणस्य च दिशि प्रयासम् करोति। अस्मिन् अवसरे इतिहास विभागाध्यक्षः डॉ राकेशकुमारशर्मा बल्हवैली- कल्याणसभायाः अध्यक्षः डॉ. दिनेश वशिष्ठः, वृद्धाश्रमप्रबन्धकः घनश्यामठाकुरः, आयोजिका सचिवः अध्यक्षा मनीषा, उपाध्यक्षः लखविन्दरः, श्रेया, सुशान्तः, भूपेन्द्रः, वन्दना, रितेशः, अजयः, आकाङ्क्षा, भूमिका, नेहा, रञ्जना, वनिता च इत्येतैः सह अन्ये सदस्याः उपस्थिताः आसन्।

# डी.पी.एस. बोकारो-
## स्वच्छभारतीयदिवसः आयोजितः



**हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो।**
महात्मागान्धिनः लालबहादुरशास्त्रिणः जयन्त्यवसरे गुरुवासरे दिल्ली-पब्लिक-विद्यालयः, बोकारो इत्यत्र स्वच्छभारतीयदिवसः उत्साहेन आयोजितः। विद्यालयस्य वरिष्ठ-प्राथमिकविभागयोः विद्यार्थिभिः विद्यालयपरिसरस्य, कक्षाणां, क्रीडाङ्गणस्य तथा समीपवर्तिक्षेत्राणां स्वच्छतां कृत्वा स्वच्छ-हरितराष्ट्रस्य सन्देशः प्रदत्तः।
विशेषप्रार्थनासभायां विद्यार्थिभिः महात्मागान्धिनः तथा लालबहादुरशास्त्रिणः जीवनादर्शाः प्रस्तुताः। 'बापू-त्रिवानराः' इति विषये काव्यपाठनं तथा प्रियभजनानां गायनमपि अभवत्। स्वच्छता-कर्मचारिणां योगदानं प्रशंस्य तेषां सम्मानः कृतः। विद्यार्थिभिः शिक्षकैश्च विद्यालयोद्याने फलवृक्षाः छायावृक्षाश्च रोपिताः तथा सामूहिकस्वच्छताशपथः स्वीकृतः। विद्यालयस्य प्राचार्यः डा. ए. एस. गंगवारः अवदत् यत् स्वच्छशरीरे एव स्वस्थं सकारात्मकं च मनः निवसति। स्वस्थराष्ट्रनिर्माणाय स्वच्छतां जनान्दोलनरूपेण विकसितुम् आवश्यकम्। सः विद्यार्थिनां सक्रियसहभागितां प्रशंसितवान्। अस्मिन् अवसरे 'स्वच्छसागरः, सुरक्षितसागरः' इत्यस्य सन्देशोऽपि प्रदत्तः।

## पर्वतीय-राज्यानां कृते पृथक् भवेयुः आपदा-आश्रय-मानदण्डाः — मुख्यमन्त्री सुक्खू

**आपदया राज्यस्य क्षतिः ३४१२.८० कोटि-रूप्यकाणि अतीता; केन्द्र-सर्वकारात् अतिरिक्तानुदानस्य आशा**

**हिमसंस्कृतवार्ता — शिमला।** हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः केन्द्र-सर्वकारात् आपदा-राहत-वितरणस्य मानदण्डेषु (Relief Norms) संशोधनस्य दृढां याचनाम् अकरोत्। सः अवदत् यत् हिमाचल-सदृशानां पर्वतीय-राज्यानां भौगोलिकी स्थितिः समतल-क्षेत्रेभ्यः सर्वथा भिन्ना वर्तते। अतः आपदया सञ्जातायाः क्षतेः आकलनाय, आश्रय-राशेः विमुक्तये च पर्वतीय-विषम-परिस्थितीः मनसि निधाय नूतनाः मानदण्डाः निर्धारणीयाः।
मुख्यमन्त्रिणा गुरुवासरे शिमलायां गृह-मन्त्रालयस्य संयुक्त-सचिवस्य एम. रामचन्द्रडू-महोदयस्य नेतृत्वे समागतेन 'अन्तर-मन्त्रालयी-केन्द्रीय-दलेन' सह उपवेशने वर्षर्तौ सञ्जातानां प्राकृतिकापदां तज्जनित-क्षतेश्च विषये गम्भीर-मन्थनं विहितम्। केन्द्रीय-प्रतिनिधि-मण्डलेन पूर्वमेव आपदा-प्रभावितानां मण्डलानां प्रत्यक्ष-निरीक्षणं कृतम् आसीत्।

**मेघ-विस्फोटानां (Cloudburst) वैज्ञानिकम् अध्ययनम् आवश्यकम्**

मुख्यमन्त्रिणा सुक्खू-महोदयेन प्रतिपादितं यत् प्रदेशे जलवायु-परिवर्तनस्य दुष्प्रभावाः अधुना प्रत्यक्षाः भवन्ति। राज्ये मेघ-विस्फोटस्य घटनाः निरन्तरं वर्धमानाः सन्ति। एतासां घटनानां कारणानां प्रभावाणां च वैज्ञानिकम् अध्ययनं कारयितुम् अतीव आवश्यकम्, येन भविष्ये प्राकृतिकापदां सङ्कटं न्यूनीकर्तुं प्रभावशालिनः उपायाः कर्तुं शक्येरन्। सः अवदत् यत् हिमाचलप्रदेशः उत्तर-भारतस्य पर्यावरण-सन्तुलने स्वच्छ-वायु-प्रदाने च महत्त्वपूर्णं योगदानं करोति। तेन राष्ट्रिय-राजमार्गाणां निर्माण-काले पर्वतानां पातनं (कटाई) न्यूनीकर्तुं मार्गेषु आन्तर्भौमिकमार्गाणाम् अधिक-निर्माणस्य आवश्यकता अपि प्रतिपादिता। अस्मिन् उपवेशने मुख्य-सचिवः जल-शक्ति-मन्त्रालयस्य निदेशकः प्रकाश-चन्दः, कृषि-मन्त्रालयस्य निदेशकः डॉ. सुभाष-चन्द्रा, ग्रामीण-विकास-मन्त्रालयस्य निदेशकः रामावतार-मीणा, आपदा-प्रबन्धन-विशेष-सचिवः पुष्पेन्द्र-राणा, केन्द्रीय-दलस्य सदस्याः, राज्य-सर्वकारस्य च वरिष्ठाधिकारिणः समुपस्थिताः आसन्।

**३४१२.८० कोटि-रूप्यकाणाम् आर्थिक-क्षतिः; 'एनडीआरएफ,' अन्तर्गतं साहाय्यस्य याचना**

अस्मिन् वर्षर्तौ मेघ-विस्फोटैः, आकस्मिक-जलप्लवैः (Flash floods), भूस्खलनैश्च प्रदेशस्य आहत्य वित्तीय-क्षतिः ३४१२.८० कोटि-रूप्यकाणि अतीता। केन्द्रीय-दलस्य चतुर्दिवसीय-प्रवासस्य अन्ते मुख्य-सचिवस्य अध्यक्षतायाम् आयोजिते उपवेशने अस्याः क्षतेः विस्तृतं विवरणम् उपस्थापितम्। राज्य-सर्वकारेण केन्द्र-पार्श्वतः 'एनडीआरएफ' (NDRF) अन्तर्गतं शीघ्रमेव अतिरिक्त-वित्तीय-साहाय्यस्य विमुक्तये आग्रहः कृतः।

# नारायणपुरे स्वच्छतासेवापक्षान्तर्गताः
## चित्रकला-निबन्ध-भाषणप्रतियोगिताः सम्पन्ना



**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, नारायणपुरं, भागलपुरम् ।** बिहारराज्यस्य भागलपुरमण्डलस्य नारायणपुर- प्रखण्डस्य मधुरापुरस्थिते उत्क्रमित- कन्या- उच्चमाध्यमिक- विद्यालये 'मम युवा भारतदेशः' इत्यभियानस्य अन्तर्गतं 'स्वच्छतासेवापक्षः' इत्युपलक्ष्ये चित्रकला- निबन्ध- भाषण- प्रतियोगितानाम् आयोजनं सम्पन्नम् अभवत्। प्रतियोगितासु विद्यालयस्य छात्राभिः स्वप्रतिभां प्रदर्शयन्तीभिः स्वच्छतायाः महत्त्वं प्रति जनजागरणस्य प्रेरणा-दायकः सन्देशः प्रदत्तः। प्रतियोगितासु विजेतृभ्यः पुरस्कारैः सम्माननमपि कृतम्। विद्यालयप्राङ्गणे आयोजितस्य कार्यक्रमस्य अध्यक्षता विद्यालयस्य वरिष्ठशिक्षकेण उमेशकुमारसाहेन कृता। कार्यक्रमस्य सुचारुसञ्चालनं स्वयंसेवकेन रन्दीपराजनेन कृतम्। प्रतियोगितारम्भे छात्राः चित्रकला, लेखनं, भाषणमाध्यमेन स्वच्छतायाः महत्त्वं, स्वच्छपर्यावरणस्य आवश्यकता, सामाजिक- दायित्वं च प्रभावपूर्णतया प्रस्तुतवत्यः। प्रतियोगितानां परिणामघोषणां सीटीओ. कुमारकार्तिकेयेन निष्पक्षतया कृता। चित्रकलाप्रतियोगितायां साक्षीकुमारी प्रथमस्थानं रूबाप्रवीण द्वितीयस्थानं, खुशी- जीनतयोः संयुक्तरूपेण तृतीयस्थानं च प्राप्तवत्यः। निबन्धप्रतियोगितायां अञ्जली प्रथमस्थानं, हर्षिका द्वितीयस्थानं, सिमरन तृतीयस्थानं प्राप्तवत्यः। भाषणप्रतियोगितायां लवली प्रथमस्थानं, रूबा द्वितीयस्थानं, मीनाक्षी तृतीयस्थानं प्राप्तवत्यः। कार्यक्रमस्य मुख्योद्देश्यं छात्रेषु स्वच्छतां प्रति जागरूकतां जनयितुं तथा तान् स्वगृहस्य, विद्यालयस्य एवं परिवेशस्य स्वच्छतायै प्रेरयितुम् आसीत्। छात्राभिः चित्रकला, निबन्धलेखनं तथा भाषणमाध्यमेन स्वच्छतायाः सन्देशः प्रभावपूर्णतया जनसमक्षे प्रस्तुतः। ग्रामीणक्षेत्रे आयोजितस्य अस्य कार्यक्रमस्य माध्यमेन बालिकाभिः स्वच्छता, स्वास्थ्यं तथा सामाजिकदायित्वं प्रति स्वजागरूकतां प्रदर्शिता। कार्यक्रमेण छात्रासु आत्मविश्वासः, सृजनशीलता तथा सामाजिकदायित्वबोधश्च वर्धितः। कार्यक्रमे मनीषकुमारगौतमः, हायतअली, राजीवकुमारगुप्तः, सूरजकुमारः, भारतीकुमारी, संस्कृतिः, अलकाकुमारी, सविताकुमारी इत्यादयः शिक्षकाः, गणमान्यनागरिकाः तथा आयोजकाः उपस्थिताः आसन्। उपस्थितैः सर्वैः विजेतृछात्राणां उत्साहवर्धनं कृत्वा तासां प्रतिभायै शुभकामनाः प्रदत्ताः। 'माय भारत' इत्यस्य माध्यमेन युवानां राष्ट्रनिर्माणे सामाजिककार्येषु च सहभागिता वर्धते। एतादृशैः कार्यक्रमैः छात्राणां सुप्तप्रतिभायाः विकासः, आत्मविश्वासस्य अभिवृद्धिः, समाजसेवायाः च भावनायाः सुदृढीकरणं भवति।

# बस्ती-मण्डलस्तरीया संस्कृतप्रतिभान्वेषणप्रतियोगिता २०२६

**संस्कृताध्ययने विकासे च सहायकः संस्कृतप्रतिभाखोजकार्यक्रमः — आचार्यः रामकिङ्करत्रिपाठी**
**आदर्शसंस्कारयुक्तसमाजस्य स्थापनायां संस्कृतस्य महत्त्वपूर्णं योगदानम् — आचार्यः बृजेशकुमारपाण्डेय**
**संस्कृतं राष्ट्रस्य संस्कृतेः आदर्शानां च संवाहकम् — प्रो. के.पी.त्रिपाठी**




बांसी, सिद्धार्थनगरम्। उत्तरप्रदेश-संस्कृत-संस्थानम्, लखनऊ इत्यस्य तत्त्वावधाने विद्या-विनोद-संस्कृत-माध्यमिक-विद्यालये, टीकुर-महुलानी, जनपद-सिद्धार्थनगरे बस्ती-मण्डलस्तरीया संस्कृतप्रतिभाखोजप्रतियोगिता-२०२६ आयोजिताभवत्।कार्यक्रमे मुख्यातिथिरूपेण राजा रतनसेन-स्नातकोत्तर-महाविद्यालयस्य, बांसी, पूर्वप्राचार्यः प्रो. के.पी.त्रिपाठी, सारस्वतातिथिरूपेण श्री ओमप्रकाशपाठकः, प्रबन्धकरूपेण श्री धर्मराजमिश्रः, संयोजक-सञ्चालकरूपेण आचार्यः बृजेशकुमारपाण्डेयः, आयोजकरूपेण विद्या-विनोद-संस्कृत-माध्यमिक-विद्यालयस्य प्रधानाचार्यः आचार्यः रामकिङ्करत्रिपाठी, निर्णायकमण्डलस्य सदस्याः डा. शिशिरमिश्रः, श्री साध्यमठम्; पङ्कजेश्वरमणित्रिपाठी, श्री वेद-संस्कृत-माध्यमिक-विद्यालयः, सारीकला; विनयत्रिपाठी, आचार्यः, विद्या-विनोद-संस्कृत-माध्यमिक-विद्यालयः, टीकुर-महुलानी च उपस्थिताः आसन्। कार्यक्रमस्य प्रारम्भे सिद्धार्थशङ्करः, जिला-सहसमन्वयकः, शिक्षकाः ओमप्रकाशत्रिपाठी, अमरजीतः, विशाल यादवः, अरविन्दप्रसादः इत्यादयः प्रबुद्धजनाः तथा वेदपाठी छात्राः जगद्गुरोः शङ्कराचार्यस्य मातुः भारत्याश्च चित्रयोः पुष्पार्चनं कृत्वा श्रद्धापूर्वकं नमनम् अकुर्वन्।कार्यक्रमं सम्बोधयन् मुख्यातिथिः प्रो. के.पी.त्रिपाठी अवदत्— "संस्कृतं अस्माकं राष्ट्रस्य संस्कृतेः आदर्शानां च संवाहकम् अस्ति। अतः वयं सर्वे संस्कृतभाषायाः प्रचार-प्रसाराय सदैव तत्पराः भवेम।" निर्णायकमण्डलस्य सदस्यः डा. शिशिरमिश्रः अवदत्— "संस्कृतभाषा समाजस्य सर्वेषु वर्गेषु एकतायाः मार्गं प्रशस्तं करोति। संस्कृतस्य विकासः राष्ट्रस्य विकासस्य आधारः अस्ति। संस्कृतभाषा आदिकालादेव ऋषीणां मुनीनां देवानां च तथा प्राचीनसभ्यतायाः संस्कृतेश्च अमूल्यं धरोहरं वहति।"कार्यक्रमस्य आयोजकः प्रधानाचार्यः आचार्यः रामकिङ्करत्रिपाठी उपस्थितानाम् अतिथीनां प्रतिभागिनां च स्वागतं कुर्वन् अवदत्— "संस्कृतप्रतिभाखोजप्रतियोगिता संस्कृतस्य अध्ययनाय विकासाय च अत्यन्तं सहायकः उपक्रमः अस्ति। अस्माभिः स्वबालकान् संस्कारितान् ज्ञानवन्तश्च कर्तुं संस्कृतभाषायाः प्रचारः प्रसारश्च करणीयः।" कार्यक्रमस्य कुशलं सञ्चालनं कुर्वन् मण्डलीयसंयोजकः आचार्यः बृजेशकुमारपाण्डेयः उक्तवान्— "पठन्तु संस्कृतं, वर्धयन्तु मानम्। प्रतियोगितायां प्राप्नुवन्तु सर्वोच्चस्थानम्॥" सः अग्रे अवदत्— "विद्या परमं बलम्, संस्कृतं विजयते।" संस्कृतं सर्वासां भाषाणां जननी इति प्रतिपादयन् सः आदर्श-संस्कारयुक्तसमाजस्य स्थापनायै संस्कृतभाषायाः सम्मानं प्रचारं च कर्तुं सर्वान् आह्वयत्।

## प्रतियोगितायां विजेतारः

संस्कृत-सामान्यज्ञान-प्रतियोगिता (बालवर्गः) प्रथमस्थानम् — शिवी त्रिपाठी, रतनसेन-इण्टर-कॉलेजः, बांसी। द्वितीयस्थानम् — शिवकुमारः, आदर्श-विद्या-संस्कृत-माध्यमिक-विद्यालयः, धर्मसिंहवा, सन्तकबीरनगरम्। तृतीयस्थानम् — देवसिंहः, सिद्धार्थ-पब्लिक-स्कूलः, करौदा-मसिना। संस्कृतगीत-प्रतियोगिता प्रथमस्थानम् — सुभद्रा पाण्डे, किसान-इण्टर-कॉलेजः, उसका-बाजार। द्वितीयस्थानम् — आशुतोषदुबे, आदर्श-विद्यालयः, संस्कृत-माध्यमिक-विद्यालयः, धर्मसिंहवा। तृतीयस्थानम् — काजल, रतनसेन-इण्टर-कॉलेजः, बांसी।
श्लोक-अन्त्याक्षरी-प्रतियोगिता प्रथमस्थानम् — सावित्रीमिश्रा, वीरा बाबा नेताजी सुभाषचन्द्रबोस संस्कृत-माध्यमिक-विद्यालयः, मेहदूपार, सन्तकबीरनगरम्। प्रतियोगितायां विजेतृभ्यः प्रतिभागिभ्यश्च पुरस्कारैः सम्मानैश्च प्रोत्साहनं प्रदत्तम्। कार्यक्रमे बस्ती-मण्डलस्य विभिन्नेषु संस्कृत-माध्यमिक-विद्यालयेषु कार्यरताः शिक्षकाः छात्राः छात्राश्च बहुसंख्यया उपस्थिताः आसन्।



# सनातनधर्मे पितॄणां महिमा(पितृपक्षविशेषः)

डॉ विमलेश झा,रमेशकुंज,
गंगौली , राजे,सरिसबपाही, मधुबनी, बिहार

भारतीयसंस्कृतेः मूलाधारः कृतज्ञता, श्रद्धा, सेवा, त्यागः, धर्मः च वर्तते। सनातनधर्मे मानवजीवनं केवलं वर्तमानजीवनस्य पृथक् अस्तित्वं न मन्यते, अपि तु पूर्वजैः प्रदत्तस्य जीवनस्य, संस्कारस्य, ज्ञानस्य, परम्परायाः च निरन्तरप्रवाहस्य एकं महत्त्वपूर्णं सोपानम् इव मन्यते। अस्माकं जन्म, पालनम्, शिक्षणम्, संस्काराः, कुलपरम्परा, सामाजिकमूल्यानि च अस्माकं पूर्वजैः सह गम्भीररूपेण सम्बद्धानि सन्ति। अतः तान् प्रति कृतज्ञताप्रकाशनं सनातनधर्मस्य महत्त्वपूर्णम् अङ्गम् अस्ति।सनातनधर्मे देवाः पूज्यन्ते, ऋषयः पूज्यन्ते, आचार्याः पूज्यन्ते, मातापितरौ च देवतुल्यौ मन्येते। तत्र पितॄणां स्थानम् अत्यन्तं विशिष्टम् अस्ति। वैदिकवाङ्मये पितॄणां बहुधा स्तुतिः कृता अस्ति। श्राद्धम्, तर्पणम्, पिण्डदानम्, पितृयज्ञः, पितृस्मरणम् इत्यादीनां धार्मिकपरम्पराणां मूलं पितॄणां प्रति श्रद्धा एव अस्ति। 'श्राद्धम्' इति शब्दः 'श्रद्धा' इत्यस्मात् शब्दात् निष्पन्नः अस्ति। श्रद्धया क्रियमाणं कर्म श्राद्धम् इत्युच्यते। अतः श्राद्धस्य मूलतत्त्वं न केवलं कर्मकाण्डः, अपितु श्रद्धा, कृतज्ञता, स्मरणं, उत्तरदायित्वबोधः च अस्ति।

### ★ 'पितृ'शब्दस्य अर्थः,पितॄन् प्रति श्रद्धायाः आवश्यकता,पितृऋणस्य अवधारणा

'पितृ'शब्दस्य सामान्यः अर्थः पिता अथवा पूर्वजः इति भवति। किन्तु धार्मिकदृष्ट्या अस्य अर्थः विस्तृतः अस्ति। पिता, पितामहः, प्रपितामहः तथा पूर्वपरम्परायां ये सर्वे दिवंगताः पूर्वजाः सन्ति, ते पितरः इति व्यापकभावेन स्मर्यन्ते।

वैदिकसाहित्ये पितॄणां विशिष्टं स्थानं दृश्यते। ऋग्वेदे पितॄन् उद्दिश्य अनेकाः ऋचः सन्ति। वैदिकऋषयः पितॄन् केवलं मृतमनुष्यरूपेण न मन्यन्ते स्म, अपि तु पूर्वपरम्परायाः आध्यात्मिकप्रतिनिधिरूपेण तेषां स्मरणं कुर्वन्ति स्म। मानवस्य वर्तमानजीवनं पूर्वजीवनानां फलस्वरूपम् अस्ति। यैः पूर्वजैः परिवारः, संस्कारः, ज्ञानम्, परम्परा, जीवनोपयोगिसाधनानि च अस्मभ्यं प्रदत्तानि, तेषां स्मरणं स्वाभाविकतया कृतज्ञतां जनयति। मनुष्यः स्वजीवने बहुभ्यः व्यक्तिभ्यः साहाय्यं प्राप्नोति, किन्तु मातापित्रोः स्थानं सर्वाधिकं महत्त्वपूर्णम् अस्ति। माता गर्भधारणेन, प्रसवेन, स्तनपानेन, पालनपोषणेन च शिशोः जीवनस्य आधारं निर्माति। पिता संरक्षणेन, शिक्षया, अनुशासनेन, परिश्रमेण च परिवारस्य पोषणं करोति। तयोः अतिरिक्तं पितामहाः, प्रपितामहाः, मातामहाः, आचार्याः तथा परिवारस्य अन्ये ज्येष्ठाः अपि बालकस्य जीवननिर्माणे योगदानं ददति। अतः पितॄणां स्मरणं वस्तुतः स्वजीवनस्य मूलस्रोतसां स्मरणम् अस्ति। सनातनधर्मे मनुष्यः त्रिभिः ऋणैः सम्बद्धः इति प्रसिद्धा परम्परा अस्ति—देवऋणम्, ऋषिऋणम्, पितृऋणम्। देवानां प्रति कृतज्ञता देवऋणस्य परिशोधनम् अस्ति। ऋषिभ्यः प्राप्तस्य ज्ञानस्य संरक्षणं प्रचारश्च ऋषिऋणस्य परिशोधनम् अस्ति। मातापितॄणां तथा पूर्वजानां प्रति कृतज्ञता पितृऋणस्य परिशोधनम् अस्ति।

पितृऋणं कश्चित् लौकिकः आर्थिकः ऋणरूपः नास्ति। एतत् जीवनस्य ऋणम् अस्ति। अस्मभ्यं शरीरं, परिवारः, संस्काराः, भाषा, परम्परा, जीवनमूल्यानि च पूर्वजैः प्रदत्तानि। अतः तान् प्रति सम्मानम् अस्माकं नैतिकं कर्तव्यम् अस्ति।

तैत्तिरीयोपनिषदि प्रसिद्धम् उपदेशवाक्यम् अस्ति—"मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।"अस्य तात्पर्यम् अस्ति—मातरं देवतुल्यां मन्यस्व, पितरं देवतुल्यं मन्यस्व, आचार्यं देवतुल्यं मन्यस्व, अतिथिं च देवतुल्यं मन्यस्व।

भारतीयजीवनदृष्टौ माता पिता च केवलं जन्मदातारौ न स्तः। तौ बालकस्य प्रथमौ गुरू स्तः। बालकः प्रथमं भाषां, आचारं, व्यवहारं, धर्मबोधं, सामाजिकमूल्यं च मातापितृभ्यामेव अधिगच्छति। अतः पितृपूजायाः प्रथमं सोपानं जीवतोः मातापित्रोः सेवा एव अस्ति।

### ★ श्राद्धस्य स्वरूपम् ,तर्पणस्य महत्त्वम्,पिण्डदानस्य महत्त्वम्,

श्रद्धया क्रियमाणं पितृसम्बन्धि धार्मिककर्म श्राद्धम् इति कथ्यते। श्राद्धे पितॄणां स्मरणम्, तर्पणम्, पिण्डदानम्, ब्राह्मणभोजनम्, दानम्, प्रार्थना च विविधरूपेण दृश्यन्ते।

'तर्पण'शब्दः 'तृप्'धातोः निष्पन्नः। तृप्तिः, सन्तोषः अथवा प्रसादनम् अस्य मूलार्थः अस्ति। जलस्य माध्यमेन देवतानां, ऋषीणां, पितॄणां च स्मरणपूर्वकं जलसमर्पणं तर्पणम् इति कथ्यते।

पिण्डदानं पितृकर्मणः प्रमुखम् अङ्गम् अस्ति। अन्नेन निर्मितः पिण्डः श्रद्धया पितॄणाम् उद्दिश्य समर्प्यते। विशेषतः गयाजीतीर्थे पिण्डदानस्य परम्परा अतीव प्राचीना अस्ति।

### ★ पितृपक्षस्य महत्त्वम्,अमावस्यायाः पितृसम्बन्धः,गयाजीतीर्थस्य पितृसम्बन्धः,त्रयः पितरः

भाद्रपदपूर्णिमातः आश्विनमासस्य अमावस्यापर्यन्तं कालः सामान्यतः पितृपक्षरूपेण प्रसिद्धः अस्ति। अस्मिन् काले जनाः स्वदिवंगतानां मातापितॄणां तथा पूर्वजानां निमित्तं श्राद्धं तर्पणं च कुर्वन्ति। पितृपक्षस्य प्रधानः सन्देशः अस्ति—स्मरणम्। सनातनपरम्परायाम् अमावस्या पितृकर्मणः कृते विशेषमहत्त्वपूर्णा मन्यते। आश्विनमासस्य अमावस्या विशेषतः 'सर्वपितृ अमावस्या' इति प्रसिद्धा अस्ति।गयाजीतीर्थं सनातनधर्मे पितृश्राद्धस्य कृते विशेषरूपेण प्रसिद्धम् अस्ति। गयामाहात्म्ये पितॄणां कृते पिण्डदानस्य विशेषं माहात्म्यं वर्णितम् अस्ति। फल्गुनदी, विष्णुपदं च गयाजीक्षेत्रस्य प्रमुखानि धार्मिकस्थलानि सन्ति। धर्मशास्त्रीयपरम्परायां पितुः, पितामहस्य, प्रपितामहस्य च विशेषस्मरणं क्रियते। अर्थात् निकटतमाः त्रयः पूर्वजाः—पिता, पितामहः, प्रपितामहः। तथैव मातृपक्षे माता, मातामहः, प्रमातामहः इत्यादीनां स्मरणं भवति।

### ★ पितृलोकस्य अवधारणा,पितॄणां सम्बन्धः पुनर्जन्मना,पितृदोषस्य अवधारणा

वैदिकपुराणिकवाङ्मये पितृलोकस्य अवधारणा दृश्यते। पितृलोकः मृतपूर्वजानां सम्बन्धितः आध्यात्मिकः लोकः इति धार्मिकपरम्परायां वर्णितः अस्ति। एते विषयाः धार्मिकदार्शनिकविश्वासस्य अन्तर्गताः सन्ति। सनातनदर्शने पुनर्जन्मस्य सिद्धान्तः अत्यन्तं महत्त्वपूर्णः अस्ति। जीवः कर्मानुसारं पुनर्जन्म प्राप्नोति इति हिन्दूदर्शनस्य बहवः सम्प्रदायाः मन्यन्ते। पितृकर्मणः चिन्तनमपि जीवन-मृत्योः निरन्तरतायाः व्यापकदृष्ट्या सम्बद्धम् अस्ति।

ज्योतिषशास्त्रे तथा केषुचित् धार्मिकपरम्परासु 'पितृदोषः' इति अवधारणा दृश्यते। एषा अवधारणा मुख्यतः ज्योतिषीय-धार्मिकविश्वासस्य विषयः अस्ति। प्रत्येकं रोगस्य, आर्थिकसमस्यायाः, वैवाहिकसमस्यायाः, सन्तानसम्बन्धिनः कष्टस्य वा कारणं पितृदोषः एव इति निश्चितरूपेण वक्तुं न शक्यते। धर्मः विवेकस्य विरोधी नास्ति।

### ★ जीवितमातापित्रोः सेवा,पुत्रस्य पितृकर्मणि अधिकारः,पितृयज्ञस्य महत्त्वम्

पितृभक्तेः सर्वोच्चं रूपं जीवितमातापित्रोः सेवा अस्ति। मृत्योः अनन्तरं श्राद्धं तर्पणं च धार्मिककर्तव्यं भवितुम् अर्हति, किन्तु जीवितावस्थायां मातापित्रोः सम्मानं, सेवा, संरक्षणं, मधुरव्यवहारः च अत्यन्तं महत्त्वपूर्णः अस्ति।

परम्परागतधर्मशास्त्रेषु पुत्रस्य पितृकर्मणि विशेषाधिकारः वर्णितः अस्ति। पुत्रः पितॄणां श्राद्धं, तर्पणं, पिण्डदानं च करोति इति सामान्यपरम्परा अस्ति। किन्तु वर्तमानसमाजे परिवारस्य स्वरूपे परिवर्तनं जातम् अस्ति। बहुषु परिवारेषु पुत्रस्य अभावे केवलं पुत्री भवति। एतादृशे सन्दर्भे विभिन्नेषु प्रदेशेषु, सम्प्रदायेषु, कुलाचारप्रथासु च विभिन्नाः परम्पराः सन्ति।

पञ्चमहायज्ञेषु पितृयज्ञस्य विशिष्टतमं स्थानम् अस्ति। देवयज्ञः, पितृयज्ञः, भूतयज्ञः, मनुष्ययज्ञः, ब्रह्मयज्ञः इति गृहस्थस्य पञ्चमहायज्ञाः प्रसिद्धाः। पितृयज्ञस्य उद्देश्यं पूर्वजानां स्मरणं, तान् प्रति कृतज्ञता तथा पारिवारिकधर्मस्य संरक्षणम् अस्ति।

### ★ श्राद्धे दानस्य महत्त्वम्

श्राद्धकाले दानस्य विशिष्टं महत्त्वमस्ति। अन्नदानम्, वस्त्रदानम्, दक्षिणादानम् इत्यादयः विविधाः आचाराः धर्मशास्त्रेषु वर्णिताः सन्ति। आधुनिककाले अपि पितॄणां स्मृतौ निर्धनेभ्यः भोजनदानम्, विद्यार्थिभ्यः पुस्तकदानम्, रोगिभ्यः चिकित्सासहायता, वृद्धसेवा, गौसेवा, वृक्षारोपणं वा कर्तुं शक्यते।भारतीयसंस्कृतौ अन्नस्य महत्त्वम् अत्यन्तम् अस्ति। उपनिषद् वदति—"अन्नं ब्रह्मेति व्यजानात्।" अन्नं जीवनस्य मूलाधारः अस्ति। श्राद्धादिषु अन्नदानस्य परम्परा एतस्यैव महत्त्वस्य द्योतिका अस्ति।श्राद्धपरम्परायां काकस्य विशेषः उल्लेखः दृश्यते। बहुषु भारतीयपरिवारेषु श्राद्धदिने काकाय भोजनं दीयते। लोकविश्वासे काकः पितॄणां प्रतीकरूपेण मन्यते। एषः विश्वासः धार्मिकसांस्कृतिकः अस्ति, वैज्ञानिकतथ्यरूपेण तस्य व्याख्या न कर्तव्या।

## ★ पितृस्मरणं लाभाः

पूर्वजानां स्मरणं प्रकृतिसंरक्षणेन सह संयोजयितुं शक्यते। पितॄणां स्मृतौ वृक्षारोपणं, नदी-जलस्रोतसां संरक्षणं, पक्षिभ्यः जलव्यवस्था, जीवसेवा च कर्तुं शक्यते। यत् पर्यावरणं पूर्वजैः अस्मभ्यं प्राप्तम्, तत् भाविसन्ततिभ्यः सुरक्षितरूपेण समर्पयितुं वयं बाध्याः स्मः।मानवजीवने शोकस्य स्थानम् अत्यन्तं गभीरम् अस्ति। प्रियजनस्य मृत्योः अनन्तरं तस्य स्मरणं, तस्य जीवनस्य सद्गुणानां चर्चा, तस्य प्रति कृतज्ञता च मनसि शान्तेः भावं जनयितुं शक्नोति। धार्मिकसंस्काराः मनुष्याय स्वशोकस्य अभिव्यक्तेः एकं सामाजिकम् आध्यात्मिकं च माध्यमं ददति।

पितृस्मरणं परिवारस्य एकतायाः महत्त्वपूर्णं साधनम् अपि अस्ति। यदि परिवारस्य ज्येष्ठाः स्वपूर्वजानां जीवनकथाः बालकेभ्यः कथयन्ति, तर्हि नवीनसन्ततिः स्वकुलस्य इतिहासं ज्ञातुं शक्नोति। पूर्वजानां नामानि, जन्मस्थानानि, व्यवसायाः, सामाजिकयोगदानानि, जीवनसंघर्षाः, सद्गुणाः च लिखितरूपेण सुरक्षिताः कर्तुं शक्यन्ते।पूर्वजानां स्मरणेन सह भाषा, साहित्यं, कला, संगीतं, वास्तु, लोकपरम्परा, धार्मिकाचारः इत्यादीनां संरक्षणमपि भवति। यदि नवीनसन्ततिः स्वपूर्वजानां भाषां, गीतानि, कथाः, लोकाचारान्, धार्मिकपरम्पराश्च विस्मरति, तर्हि शनैः सांस्कृतिकस्मृतिः क्षीयते। अतः पितृस्मरणं सांस्कृतिकसंरक्षणस्य अपि माध्यमम् अस्ति।

### ★ रामायणे पितृभक्तिः,महाभारते पितृधर्मः,गरुडपुराणे पितृविचारः

रामायणे पितृभक्तेः अद्भुतः आदर्शः दृश्यते। अयोध्याधिपतेः दशरथस्य वचनपालनाय श्रीरामः वनवासं स्वीकृतवान्। रामस्य जीवनं दर्शयति यत् पितरं प्रति सम्मानं केवलं वचनैः न, अपि तु त्यागेन कर्तव्यपालनेन च प्रकाश्यते। महाभारते वंशपरम्परा, पितृभक्तिः, पारिवारिककर्तव्यं, उत्तराधिकारः, धर्मः इत्यादयः विषयाः विस्तरेण चर्चिताः सन्ति। भीष्मपितामहस्य जीवनं पितृभक्तेः महान् आदर्शः अस्ति। पितुः इच्छापूर्तये भीष्मः आजीवनब्रह्मचर्यस्य प्रतिज्ञां स्वीकृतवान् गरुडपुराणे मृत्योः अनन्तरजीवनम्, अन्त्येष्टिः, श्राद्धम्, प्रेतभावः, पितृलोकः इत्यादयः विषयाः विस्तरेण वर्णिताः सन्ति। एते धार्मिकदार्शनिकपरम्परायाः अन्तर्गताः सन्ति। तानि आधुनिकवैज्ञानिकतथ्यानि इति न प्रस्तोतव्यानि।

### ★ पितृभक्तेः वास्तविकं स्वरूपम् ,पितृऋणस्य परिशोधनम्

पितृभक्तिः केवलं तर्पणेन वा पिण्डदानेन वा पूर्णा न भवति। पूर्वजानां सद्गुणानाम् अनुकरणं पितृभक्तेः श्रेष्ठतमं रूपम् अस्ति। यदि पूर्वजः सत्यवादी आसीत्, तर्हि तस्य वंशजः सत्यं वदतु। यदि पूर्वजः परिश्रमी आसीत्, तर्हि वंशजः परिश्रमं कुर्यात्। यदि पूर्वजः समाजसेवी आसीत्, तर्हि तस्य वंशजः लोकसेवां कुर्यात्। सनातनधर्मस्य मूलं श्रद्धा, सत्यं, धर्मः, सेवा च अस्ति। अतः श्राद्धकर्मणि अत्यधिकप्रदर्शनस्य, स्पर्धायाः, अनावश्यकव्ययस्य वा धार्मिकमहत्त्वं नास्ति। यस्य परिवारस्य आर्थिकसामर्थ्यं न्यूनम् अस्ति, सः स्वशक्त्यानुसारं श्रद्धापूर्वकं तर्पणं, अन्नदानं, सेवा वा कर्तुं शक्नोति।पूर्वजानां स्मृतौ परोपकारः कर्तुं शक्यते। उदाहरणरूपेण दरिद्रेभ्यः अन्नदानम्, विद्यार्थिभ्यः पुस्तकदानम्, रोगिभ्यः चिकित्सासहायता, वृद्धेभ्यः सेवा, वृक्षारोपणम्, गौसेवा, पक्षिभ्यः जलदानम्, अनाथबालकानां सहायता, धार्मिकग्रन्थानां वितरणम् इत्यादीनि कार्याणि वयं कर्तुं शक्नुमः। एवं पितृस्मरणं केवलं परिवारस्य सीमायां न स्थित्वा समाजस्य कल्याणं करोति। पितृऋणं कथं परिशोधनीयम्? मातापित्रोः सेवा, पूर्वजानां स्मरणम्, श्राद्धतर्पणादिकर्म, कुलपरम्परायाः संरक्षणम्, सदाचारः, परोपकारः, सन्तानानां सद्संस्कारः, समाजहिताय कर्म, प्रकृतिसंरक्षणम्—एतानि सर्वाणि पितृऋणपरिशोधनस्य व्यापकानि साधनानि भवितुम् अर्हन्ति। वास्तविकं पितृऋणपरिशोधनं तदा भवति, यदा मनुष्यः स्वजीवनं पूर्वजानां सद्गुणैः समृद्धं कृत्वा भाविसन्तत्यै उत्तमं जीवनमूल्यं समर्पयति।पूर्वजाः अतीतस्य प्रतिनिधयः सन्ति, वयं वर्तमानस्य प्रतिनिधयः स्मः, अस्माकं सन्ततिः भविष्यस्य प्रतिनिधिः भविष्यति। अतः जीवनस्य त्रयः कालाः—अतीतम्, वर्तमानम्, भविष्यत्—पितृधर्मे परस्परं सम्बद्धाः भवन्ति। अतीतं प्रति कृतज्ञता, वर्तमानं प्रति उत्तरदायित्वम्, भविष्यं प्रति दूरदर्शिता—एषः पितृधर्मस्य व्यापकः सन्देशः अस्ति।

### ★ पितृपक्षस्य आधुनिकसन्देशः, पितृपूजायाः दार्शनिकसन्देशः

आधुनिकजीवने मनुष्यः अत्यन्तं व्यस्तः अस्ति। परिवाराः लघुतराः भवन्ति, संयुक्तपरिवाराः न्यूनाः भवन्ति, वृद्धाः कदाचित् एकाकिनः भवन्ति। अतः पितृपक्षः अस्मान् स्मारयति—वृद्धानां सेवा कुर्मः। मातापित्रोः सम्मानं कुर्मः। पूर्वजानां जीवनकथाः बालकेभ्यः कथयामः। कुलपरम्परां संरक्षामः। दानं परोपकारं च कुर्मः। आगामिपीढीभ्यः उत्तमान् संस्कारान् दद्मः। पितृपूजा गहनं दार्शनिकतत्त्वं वहति। मनुष्यः स्वतन्त्रः अस्ति, किन्तु पूर्णतया स्वनिर्मितः नास्ति। तस्य शरीरं मातापितृभ्यां प्राप्तम्। तस्य भाषा समाजात् प्राप्ता। तस्य ज्ञानं ऋषिभ्यः प्राप्तम्। तस्य संस्काराः परिवारात् प्राप्ताः। तस्य अन्नं पृथिवीतः कृषकेभ्यश्च प्राप्तम्। तस्य जीवनं प्रकृतेः अनुग्रहेण सम्भवति। अतः मनुष्यः अनेकेषाम् ऋणानां मध्ये जीवनं यापयति। पितृपूजा अस्यैव सत्यस्य स्मरणम् अस्ति।

## ★ पितॄणां महिमा

पितरः अस्माकं जीवनपरम्परायाः आधारभूताः सन्ति। तेषां कारणेन वयम् अस्तित्वं प्राप्तवन्तः। तेषां संस्कारैः अस्माकं चरित्रनिर्माणं जातम्। तेषां परिश्रमेण परिवारः विकसितः। तेषां त्यागेन वयं सुखानि अनुभूतवन्तः। अतः पितॄणां महिमा केवलं धार्मिकग्रन्थेषु निहिता नास्ति। सा अस्माकं प्रतिदिनजीवने अनुभूयते।मातुः स्नेहः, पितुः संरक्षणम्, पितामहस्य अनुभवः, प्रपितामहस्य परम्परा—एते सर्वे अस्माकं जीवनस्य आधाराः सन्ति। सनातनधर्मे पितॄणां स्थानम् अत्यन्तं पवित्रम् अस्ति। पितृपूजा केवलं मृतपूर्वजानां निमित्तं क्रियमाणः कर्मकाण्डः नास्ति। सा कृतज्ञतायाः, स्मरणस्य, पारिवारिककर्तव्यस्य, सांस्कृतिकपरम्परायाः तथा नैतिकजीवनस्य व्यापकः संदेशः अस्ति।

श्राद्धं श्रद्धां जनयति। तर्पणं कृतज्ञतां प्रकाशयति। पिण्डदानं पूर्वपरम्परां स्मारयति। दानं लोकसेवां प्रेरयति। मातापित्रोः सेवा पितृभक्तेः प्रत्यक्षं रूपम् अस्ति। पूर्वजानां सद्गुणानाम् आचरणं तेषां वास्तविकं सम्माननम् अस्ति। पितॄणां स्मरणेन मनुष्यः स्वस्य मूलं जानाति। मूलस्य ज्ञानं विनयम् उत्पादयति। विनयः कृतज्ञतां जनयति। कृतज्ञता धर्मं जनयति। धर्मः समाजस्य संरक्षणं करोति।अतः पितृधर्मस्य सारः केवलम् एतावता नास्ति यत् वर्षे कदाचित् एकस्मिन् दिने श्राद्धं करणीयम्। अस्य व्यापकः संदेशः अस्ति—पूर्वजानां सम्मानं कुर्मः, जीवितमातापित्रोः सेवां कुर्मः, तेषां सद्गुणान् स्वजीवने धारयामः, परिवारस्य संस्कृतिं रक्षामः, समाजस्य हितं कुर्मः, भाविसन्ततिभ्यः उत्तमं जीवनमूल्यं समर्पयामः।




# वसिष्ठसम्मानेन सम्मानिताः भविष्यन्ति जगद्गुरुः विद्याभास्करः

अयोध्या। वसिष्ठ-फाउण्डेशन-ट्रस्टस्य पक्षतः अस्मिन् वर्षे प्रतिष्ठितः वसिष्ठसम्मानः जगद्गुरु-रामानुजाचार्याय स्वामिने वासुदेवाचार्याय विद्याभास्कराय प्रदास्यते। सामाजिकक्षेत्रे उल्लेखनीयकार्याणां कृते दि आयुष्मान् फाउण्डेशन संस्थायै बृजनन्दन-ब्रह्मचारी-सम्मानः अपि प्रदास्यते। उभौ सम्मानौ अक्टोबर-मासस्य चतुर्थे दिने आयोजिते समारोहे प्रदास्येते।

न्यायघाटस्थिते पौराणिके गुरुपीठ-तिवारी-मन्दिरस्य सभागारे बुधवासरे आयोजितायां ट्रस्टस्य बैठके सम्मानार्थं चयनप्रक्रियायां अन्तिममुद्रा स्थापिता। सभायाः अध्यक्षता ट्रस्टस्य अध्यक्षः तथा महापौरः गिरीशपति त्रिपाठी अकरोत्। ट्रस्टस्य सचिवा राजलक्ष्मी तिवारी अवदत् यत् मन्दिरस्य संस्थापकस्य तथा वसिष्ठावताररूपेण प्रतिष्ठितस्य पण्डित उमापति त्रिपाठी-महाभागस्य जन्मोत्सवे प्रतिवर्षं वसिष्ठसम्मानः प्रदीयते।अस्मिन् वर्षे वेद-वेदाङ्ग-पुराण-उपनिषदां विद्वान् तथा अयोध्यायाः प्रतिष्ठितः धर्माचार्यः जगद्गुरुः रामानुजाचार्यः स्वामी वासुदेवाचार्यः विद्याभास्करः वसिष्ठसम्मानाय चयनितः अस्ति।

**सनातनधर्मस्य उत्थाने योगदानाय सम्मानः**

धर्मगुरुः स्वामी वासुदेवाचार्यः विद्याभास्करः सनातनधर्मस्य उत्थाने कृतस्य महत्त्वपूर्णस्य योगदानस्य कृते सम्मानितः भविष्यति। वसिष्ठसम्मानस्य आरम्भः २०१८ तमे वर्षे अभवत्। साहित्ये तथा सनातनधर्मक्षेत्रे विशिष्टं योगदानं दत्तवद्भ्यः व्यक्तिभ्यः अयं सम्मानः प्रदीयते।स्वातन्त्र्यसङ्ग्रामस्य सेनानी बृजनन्दन-ब्रह्मचारी-महाभागस्य स्मृतौ प्रदीयमानः सम्मानः अस्मिन् वर्षे दि आयुष्मान् फाउण्डेशन संस्थायै प्रदास्यते। एषा संस्था शिक्षाक्षेत्रे, रक्तदाने, वृद्धजनानां तथा बेजुबान् प्राणिनां सेवायां च कार्यं कुर्वती अस्ति। सामाजिकक्षेत्रे संस्थायाः उल्लेखनीयकार्याणि दृष्ट्वा तस्याः चयनं कृतम् अस्ति।




# "संस्कृतकथामञ्जरी" {२४}
## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।
## "अथ सूर्यलोकगमनं नाम अष्टादशोपाख्यानम्"

पुनरपि भोजो यावत् सिंहासने समुपवेष्टुकामो याति, तावदन्या पुत्तलिका तं निवारयन्ती भणति- भो राजन्! नीतिकुशलो विक्रमो राजा सुनयेन प्रजाः पालयन् औदार्य्यादिगुणैः सर्व्वलोकानां वरणीयोऽभवत्। तस्येदं सिंहासनं, तदनुरूपा नीतिकुशलता औदार्य्यादयः गुणाश्च त्वयि सन्ति चेत् तर्हि एतत् सिंहासनम् अध्यासितव्यम्। राज्ञोक्तं- नीतिमार्गः कीदृशः कथ्यताम्। पुत्तलिकयोक्तं- भो राजन्! श्रूयतां- मणिपुरे गोविन्दशर्मा ब्राह्मणः सकलनीतिशास्त्रज्ञः स्वपुत्राय नीतिशास्त्रं कथयति, तदा मयाऽपि नीतिशास्त्रं श्रुतम्, तत् तुभ्यं निवेदयामि।

राज्ञोक्तं- निरूपय। पुत्तलिकयोक्तं- श्रूयतां राजन्! बुद्धिमता पुरुषेण दुर्जनैः सह सङ्गो न कर्त्तव्यः यतः स एव अनर्थ परम्पराया हेतुर्भवति। आर्त्ताय दानं दातव्यं, धर्मज्ञानेन मनसा, कर्मणा, वाचा परोपकारः कर्त्तव्यः। एतत् सामान्यपुरुषाणां नीतिशास्त्रमुपदिष्टम्। स विक्रमो राजा स्वभावतः एव नीतिशास्त्रज्ञः। एवं काले गच्छति, एकदा कश्चित वैदेशिकः समागत्य राजानं दृष्ट्वा उपविष्टः।

ततो राज्ञा भणितं- भो राजन्! अहं वैदेशिकः, मम कोऽपि निवासो नास्ति, सर्वदा परिभ्रमणमेव करोमि। राज्ञोक्तं- पृथिवीं भ्रमता त्वया किं अपूर्वं दृष्टम्?

तेनोक्तं- भो राजन्! महदेकम् आश्चर्य्यं दृष्टम्। राज्ञोक्तं- किं तत्? तेनोक्तम्- उदयाचले आदित्यस्य महान् प्रसादोऽस्ति, तत्र गङ्गा प्रवहति, गङ्गातटे पापविनाशनो नाम शिवालयोऽस्ति। तत्र गङ्गा प्रवाहात् कश्चित सुवर्णस्तंभो निर्गच्छति, तस्य उपरि नवरत्नखचितं सिंहासनमस्ति स सुवर्णस्तम्भः सूर्योदयादुपरि पूर्णवृङ्गि लब्ध्वा मध्याह्ने सूर्यमण्डलं प्राप्नोति। तत् सूर्योयावदस्तं गच्छति तावत् स्वयमेव प्रत्यावृत्य गङ्गाप्रवाहे मज्जति। प्रतिदिनमेव तत्र भवति। एतन्महदाश्चर्य्यं मया दृष्टम्। राजा विक्रमोऽपि तच्छुत्वा तेन सह तत् स्थानं गतो रात्रौ निद्रां गतः। प्रभातसमये सूर्य्यास्य यावदुदयो भवति तावत् गङ्गाप्रवाहात रत्नसिंहासनयुक्तो हेमस्तम्भः निर्गतः। तस्मिन् समये स्तम्भे राजा स्वयमुविष्टः। स्तम्भोऽपि सूर्य्यमण्डलं प्रति गन्तुं प्रवृत्तः यावत् सूर्य्यसमीपं गच्छति तावदग्निकणासदृशैः सूर्य्यकिरणैः राजशरीरं मांसपिण्डाकारमभूत्। ततः पिण्डरूपेण सूर्य्यमण्डलं प्राप्य-

**"नमः सवित्रे जगदेकचक्षुषे,**
**जगत्प्रसूतिस्थितिनाशहेतवे।**
**त्रयीमयाय त्रिगुणात्मधारिणे,**
**विरञ्चिनारायणशङ्करात्मने।।"**

इत्येवं नमस्कारः। सूर्यः स्तम्भम् अमृतेनाभ्यषिञ्चत्। तेन राजा दिव्यशरीरो जातः. सूर्येणोक्तं- भो राजन्! त्वं महासत्त्वाधिकोऽसि यदेतन्मण्डलं कस्यापि अगम्यं तत्र त्वं प्राप्तोऽसि, तदहं प्रसन्नोऽस्मि वरं वृष्णीष्व। राजा वदति- किं मत्तोऽधिकः परोऽस्ति? यन्मुनीनामप्यगम्यं तव स्थानं तदर्हे प्राप्तः। तव प्रसादात् सर्वमप्यर्थजातं मम सञ्जातम्। तद्वचनेनातिसन्तुष्टः सूर्यो नवरत्नखचिते स्वकीय कुण्डले दत्वा भणति- भो राजन्! एतत् कुण्डलद्वयं प्रतिदिनमेकं सुवर्णभारं प्रयच्छति। ततो राजा कुण्डलद्वयं गृहीत्वा पुनः सूर्यं नमस्कृत्य प्रत्यावृत्तात् तस्मात् स्तम्भादुत्तीर्य्य यावदुज्जयिनीं प्रति आगच्छति, तावत् कश्चित ब्राह्मणो मार्गे समागत्य आशिर्वादसुच्चार्य्य भणति- भो यजमान! अहं कुटुम्बी ब्राह्मणः परं दरिद्रः सर्वत्र भिक्षाटनं करोमि, तथाऽपि उदरं न पूर्य्यते। तच्छुत्वा राजा कुण्डलद्वयं तस्मै दत्त्वा भणति- भो ब्राह्मण! एतत् कुण्डलयुगलं नित्यं सुवर्णभारमेकं तुभ्यं दास्यति। तच्छ्रुत्वा ब्राह्मणोऽतिसन्तुष्टो राजानं सविशेषं सन्मान्य निजस्थानं जगाम, राजाऽप्युज्जयिनीमगात्।

इति कथां कथयित्वा पुत्तलिका अब्रवीत्- भो राजन्! त्वयि एवम् धैर्यमौदार्य्यश्च विद्यते चेत्, तर्हि अस्मिन् सिंहासने समुपविश। राजा तूष्णीं बभूव।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्** ®©



# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। प्रथमा वार्ता 'कालिफोर्निया' प्रदेशात्। तत्र केनचित् सङ्घेन सर्वाणि त्यक्तानि नौकायानानि जनेभ्यः विना मूल्यं दत्तानि। किन्तु जनैः तत्रत्यानां निवासिनां नौकायानानि अपि अपहृतानि!

**नन्दिनी-** अहो जनानां लोभः! एतत् अतीव विस्मयकरम्। द्वितीया वार्ता शल्यचिकित्साविषये। 'हार्वर्ड' वैद्यैः नूतनम् आश्चर्यं दृष्टम्। यदा वृद्धस्य दातुः हृदयं यूनि शरीरे स्थापितं, तदा तेन हृदयेन अपि तारुण्यं प्राप्तम्।

**काव्या-** अत्यद्भुता सा शारीरिकी प्रक्रिया! तृतीया वार्ता अन्तरिक्षात्। खगोलशास्त्रज्ञैः 'टी-ओ-आय' नामकः एकः महाग्रहः लक्षितः। तस्य वक्रगतिः तैः ज्ञाता। अतः सः ग्रहः सप्तवर्षेषु अस्माकं दृष्टेः पूर्णतया लुप्तः भविष्यति।

**नन्दिनी-** आश्चर्यमयी खलु एषा सृष्टिः! अन्तिमा वार्ता मङ्गलग्रहात्। अस्मिन्नेव सप्ताहे मङ्गलग्रहे नववर्षस्य आरम्भः सञ्जातः। वैज्ञानिकैः तत्र ऊनचत्वारिंशत्-तमस्य वर्षस्य प्रवेशः उद्घोषितः। यतः तस्य ग्रहस्य वर्षं भूमेः वर्षात् द्विगुणं दीर्घकालिकम् अस्ति।

**काव्या-** सत्यम्! मङ्गलग्रहाय नववर्षस्य शुभकामनाः। अद्यतनीयः कार्यक्रमः अत्रैव समाप्तः।

## रविः खरिडेहालः - बेङ्गलूरु।
## "भारतीय ज्ञान प्रणाल्याः पुस्तकेषु आकारं गृह्णन्ति।"

वर्ष २०४७ पर्यन्तं विकसित-भारत यात्रायां आईकेएस् - भारतीय ज्ञान प्रणाली (IKS) प्रमुखभागः अस्ति । भारतीय ज्ञान प्रणाली सर्वेषां भारतीयानां निजि परिचयः प्रदाति । एतेभ्यः पुस्तकेभ्यः छात्राणां मनसि वस्तुतः भारतः प्रतिबिम्बितः भवति ।विकृतः इतिहासः न आदर्शः किन्तु निजि इतिहासः एव आदर्शः। रामराज्यं आदर्शशासनसंकल्पनारूपेण गान्धिना उक्तम्। एतत् पुस्तके अपि दृश्यते । अन्येषु विषयेषु प्रमुखविषयाः पुस्तके सन्ति यधा एवम्। सेन्गोल्-गदा धर्मस्य विजयस्य प्रतीकं भवति । संसदेषु अस्य सेङ्गोलस्य स्थापनायाः उल्लेखः प्राप्यते। शासनस्य प्रतीकत्वेन सेङ्गोलः चोलकालस्य अस्ति । मुण्डकोपनिषदि सत्यमेवजयते तथा महाभारतात् यतो धर्मस्ततो जयः सर्वकारेण सर्वोच्चन्यायालयेन च क्रियते। महाराणप्रतापेन हल्दीघटीयुद्धे प्रयुक्तानां युद्धविधिनाम् अपि उल्लेखः प्राप्यते ।